डिडेपयिषुः ; डेपयितव्यम् , डिडेपयिषितव्यम् ; डेपनीयम् , डिडेपयिषणीयम् ; डेप्यम्, डिडेपयिष्यम् ; ईषड्डेपः-दुर्डेपः-सुडेपः ; डेप्यमानः, डिडेपयिष्यमाणः ; डेपः, डिडेपयिषः ; डेपयितुम्, डिडेपयिषितुम् ; डेपना, डिडेपयिषा ; डेपनम् , डिडेपयिषणम् ; डेपयित्वा, डिडेपयिषित्वा ; प्रडेप्य, प्रडिडेपयिष्य ;
डेपम् २, डेपयित्वा २, } डिडेपयिषम् २ ; डिडेपयिषित्वा २. }

**(650) "डिप सङ्घाते" (X-चुरादिः-1678. अक. सेट्. आत्म.)**

**आकुस्मीयः । [अ]**

'सङ्घाते डेपयेतेति, क्षेपे डिपति डिप्यति ।
डेपयेदिति चत्वारि णिचि शे श्यनि णौ डिपेः ॥' (श्लो. 134) इति देवः ।

डेपकः-पिका, डिडेपयिषकः-षिका, डेपयमानः, डेपितः,[A] इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकडेपयतिवत् (649) ज्ञेयानि । अस्य धातोराकुस्मीयत्वात् 'आकुस्मादात्मनेपदिनः' (ग. सू. चुरादौ) इति आत्मनेपदमेव । तेन शत्रादेशघटितानि रूपाण्यस्य धातोर्नेति तस्मादस्य विशेषः ।

**(651) "डीङ् विहायसा गतौ" (I-भ्वादिः-968-अक. सेट्. आत्म.) [आ]**

'विहायसां गतौ डीङो डयते डीयते पदे ॥' (श्लो. 20) इति देवः ।

[1]डायकः-यिका, डायकः-यिका, [2]डिडयिषकः-षिका, डेडीयकः-यिका ; डयिता-त्री, डायियिता-त्री, डिडयिषिता-त्री, डेडीयिता-त्री ; — डाययन्-न्ती, डाययिष्यन्-न्ती-ती ; — —

---

1. 'अचो ञ्णिति' (7-2-115) इति वृद्धौ, आयादेशः ।
2. अस्य धातोरुदात्तत्वात् सन इडागमो भवति । उत्तरखण्डे गुणायादेशौ । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

अ. "डबि डिबि' इति चन्द्रः । विडम्बयति । आडम्बरः । डिम्बयति । डिम्बम् = शस्त्रकलहः । " इति क्षीरस्वामी । प्रदर्शितप्रयोगानुसारेण डबिडिबिधात्वोरपि पाठः समीचीन इति प्रतिभाति ।

A. 'संडापितः सदसि डेपितत्रणिवीरे भोजेन्द्रतन्त्रणविनिन्द्यमन्त्रतैवम् ॥' धा. का. 3-33.

आ. 'विहायसां गतौ' इति देवसम्मतं पाठमनूद्य, 'विहायसां = विहगानाम्' इति पुरुषकारे व्याख्यातम् । 'आकाशगतौ' इति, 'विहायसि गतौ' इति च केचिदर्थं वर्णयन्ति ।